National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(54): 196-198
© 2024 NJHSR
www.sanskritarticle.com

**डॉ. पिताम्बरमिश्रः**
संविदाध्यापकः, नव्यन्यायविभागः,
केन्द्रियसंस्कृतविश्वविद्यालयः,
श्री सदाशिवपरिसरः, पुरी

**Correspondence:**
**डॉ. पिताम्बरमिश्रः**
संविदाध्यापकः, नव्यन्यायविभागः,
केन्द्रियसंस्कृतविश्वविद्यालयः,
श्री सदाशिवपरिसरः, पुरी

# न्यायदर्शने आत्मतत्त्वविचारः

**डॉ. पिताम्बरमिश्रः**

न्यायदर्शने तावत् जीवात्मा परमात्मा च आत्मशब्देन व्यपदिश्यते। आत्मा तु परमात्माक्षेदाज्ञश्चेति द्विविधः परमात्मा ईश्वर एक एव। आत्मलक्षणं तावत् "ज्ञानाधिकरणम् आत्मा"[1] इति। ज्ञानस्य अधिकरणम् आत्मा, जीवात्मपरमात्मनोः साधारणलक्षणम् इदम् उभयविधस्यादि आत्मनो ज्ञानवत्वात्, तत्र जीवस्य ज्ञानम् अनितमम्, बहु प्रत्यक्षानुमित्यादिरूपं च जीवस्य ज्ञानम् अनित्यम्। बहु प्रत्यक्षानुमित्यादिरूपं च परमात्मनो ज्ञानं तु नित्यम्, एकं प्रत्यक्षरूपं च, यद्वा आत्मत्वजातिमान् आत्मेति लक्षणम्। सा च आत्मत्वजातिः जीवात्मनि परमात्मनि च वर्त्तते, जीवात्मनि सुखदुःखदीनां समवायि कारणतावच्छेदकतया आत्मत्वं सिद्धम्। परमात्मनि अपि आत्मत्वजातिरस्ति "आत्मा वा अरे द्रष्टव्यः" इत्यादि श्रुतौ आत्मशब्दव्यवहारात्, तस्मिन् सुखादीनां स्वरूपयोग्यकारणतासत्वात् तदवच्छेदकतया च आत्मत्वसिद्धेः, न च ईश्वरे सुखदुःखादीनां प्रसङ्गः। ननु नित्यस्य स्वरूपयोग्यस्य फलम् अवश्यम्भावि इति चेत्। न जलपरमाणौ स्नेहानुतपत्त्या तादृशनियमे मानाभावात्। परे तु ईश्वरे आत्मत्वजातिः स्नेहानुतपत्त्या तादृशनियमे माना भावात्। परे तु ईश्वरे आत्मत्वजातिर्नास्ति एव सुखदुःखादिजनक-तायास्तत्र अभावात्। न च ईश्वरस्य दशमद्रव्यत्वापत्तिः ज्ञानवत्त्वेन ज्ञानाधिकरणत्वेन वा तस्य आत्मनि अन्तर्भावात्[2] इत्याहुः।

चार्वाकमते चैतन्यविशिष्टो देह एवात्मा। पृशिव्यादिभूतचतुष्टयस्य परिणामेन देहे चैतन्यमुत्पद्यते। देहेन सदैव तस्या उत्पत्तिविनाशाङ्कीकारात् तस्य अनित्यत्वं, चार्वाकैकदर्शनेः केचिद् इन्द्रियाव्धोवात्मा इत्याहुः अपरे च मन एवात्मेति मन्यन्त। बोद्धेषू माध्यमिकानां मते शुन्यमेवात्मा, योगाचारबौद्धानां मते विज्ञानस्वरूप आत्मा, तस्य च प्रतिक्षणं भेदाद् अनित्यत्वम्, जैनानां मते देहपरिमाणो देहाद्यातिरिक्तो जीवात्मा नैयायिकवैशेषकणां नये तावद् देहन्द्रियेभ्यो भिन्नो नित्य आत्मा अङ्गीक्रियते। तदुक्तं "जीवास्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च"[3] इति अन्नं भट्टापादैः।

"ज्ञानाधिकरणमात्मा" इति जीवात्मपरमात्मनोर्यत् साधारणं लक्षणम्, तत् जीवात्मनि इत्थं प्रयोज्यम् "अहं सुखी" "अहं दुःखी" "अहं जानामि" इत्यादीनां ज्ञानानाम् अधिकरणम् आत्मा। समवायेन ज्ञानवान् इत्यर्थः आत्मत्वजातिमान् आत्मेति साधारणलक्षणम् यदि अत्र अनुगतम्। तत्रान्येषां मत आत्मा अहं प्रत्ययविषय इति आत्मनः प्रत्यक्षत्वम्। तेषां मते आत्मत्वजातिरपि प्रत्यक्षसिद्धा, येषां मते शरीराद्यतिरिक्ततया आत्मनः प्रत्यक्षत्वं नास्ति, तेषां मते आत्मत्वजातिर्नप्रत्यक्षसिद्धा। अपि तु अनुमेया, "आत्मनि सुखदुःखादीना समवायेन उत्पत्तौ सत्याम् " "अहं सुखी" "अहं दुःखी" इति प्रतीतिः भवति। अतः आत्मा सुखदुःखादिगुणानां समवायकारणम् सुखादीनां समवायकारणता आत्मनि वर्त्तते। तस्याः समवायकारणताया अवच्छेदकधर्मश्च किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्। दण्डनिष्ठघटकारणतावत् इत्यनुमानेन प्रयोगः कारणतावच्छेदकतया च यो धर्मः अनुमीयते तदेव आत्मत्वम् इति।

सुखादिसमवायिकारणतया आत्मत्वजातिः सिद्ध्यति।[4] सा आत्मत्वजातिः जीवात्मनि अस्यैव इति लक्षणसमन्वयः।

अयमात्मा “अहम्” इति प्रत्ययस्य बुद्धिः सुखं दुःखम्, इच्छा, द्वेषः, प्रयत्नः संख्या, परिमाणम्, पृथकत्वम्, संयोगः, विभागः, भावनाख्यसंस्कारः, धर्मः, अधर्मः इति चतुर्दशानां गुणानां च आशयः। तदुक्तं कारिकावल्याम् – बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दशः।[5]

“अहंकाराश्रयोऽयम्” इति विभुबुद्धादिगुणवान् इति च, वेदान्तिकानां मते आत्मा ज्ञानस्वरूपः सुखस्वरूपश्च। नैयायिकानां मते तु ज्ञानम् आत्मनो न स्वरूपम् अपितु गुणविषय एव। मुक्तावस्थायाम् आत्मा देहेन्द्रियेभ्यो भिन्नः सन् तिष्ठतीति तदा कस्यापि अनुभवस्याभावात् सर्वे विशेषगुणा अपि नश्यन्ति। तथा च मुक्तत्वादपि ज्ञानसुखादिकम् अपि न विद्यते, विशेषगुणोच्छेदे हि आत्मनः स्वरूपोऽवस्थानां भवति। नावानाम् आत्मविशेषगुणानाम् अत्यन्तोच्छेदश्च मोक्षः।

जीवात्मा नित्योऽपि सन् प्रतिशरीरं भिन्नः सुखदुःखादेः वैचित्र्यात् इति जीवातमनो बहुत्वं नैयायिकानां सम्मतम्, सुखदुः खाद्युधिकरणरुपो जन्ममरणाद्यधीनश्च जीवः। यद्येकं एव आत्मा स्यात् तदा प्रादुर्भावः किं नावलोक्यते? अन्तः सञ्ज्ञानां वृक्षलतादीनान्तु तत उद्भवः स्पष्ट एव।

एकस्य जन्मनि सर्वे एव जायेरन्। एकस्ये मरणे सर्वेऽपि म्रियेरन्। एकस्य करणवैकल्ये सर्वेषां करणवैकल्पं स्यात्, न त्वेवं भवति। अपि च जीवानाम् अयुगपत्प्रवृत्तिदृश्यते, एके धर्म्मे प्रवृत्ताः अन्येऽधर्मे वैराग्येऽन्ये जीवानां त्रिगुणभावविपर्ययश्च दृश्यते। यथा कोऽपि सात्त्विकः सुखी अन्यो राजसः दुःखी अन्यस्तामसौ मोहवान् इति। अतः जीवात्मनो बहुत्वं सिद्धमिति नैयायिकानां सिद्धान्तः। अस्मिन् विषये सांख्याचार्यैः सह नैयायिकानाम् ऐकमत्यं दृश्यते। तथाहि सांख्यकारिकायां –

**“जन्ममरणकरणानां प्रतिनियमाद्युगपत् प्रवृत्तेश्च।**

**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैव इति॥”[6]**

जीवेश्वरयोर्भेदो न स्वीकरणीयः ज्ञानाज्ञान-सुखीत्व दुःखित्वादिभिः जीवानां परस्पर भेदात् ईश्वरः जीवात्मनो भेदोऽपि सिद्धः। तथाहि कस्यचिद् जीवस्य ज्ञानं, कस्यचिद् अज्ञानं, कस्यचित् सुखं, कस्यचित् दुःखमिति। यद् युगपद्विरुद्धधर्म्माध्यस्तं तन्नाना इति नियमाद् जीवानां भेदः स्वीकरणीयः एकत्वानेकत्वत्वयोश्च एकत्र विरोधेन एकस्य ईश्वरस्य अनेकजीवैः सह अभेदासम्भवात् जीवेश्वरयेर्भेदः स्वीकरणीयः, अपि च ईश्वरस्य जीवात्मकत्वे कश्चित् संसारी बद्धः, कश्चित् मुक्त इति, बन्धमोक्षव्यवस्थाया अपि अनुपपत्तिः स्यात्, बन्धमुक्तात्मनोः ईश्वराभेदेन ऐक्यात्, श्रुतिप्रसिद्धं तत्त्वमस्या-दिवाक्यं न जीवेश्वरयोः अन्नदपरम्, भेदस्य प्रमाणसिद्धत्वात्, किं तर्हि ? “ममात्मा भद्रसेनः” इतिवद् ईश्वरानुरक्तिप्रतिपादकत्वेन औपचारिकोऽयम् आनन्दः न वास्तवः मोक्षदशायाम् अज्ञाननिवृत्तौ आनन्दो जायते इत्यादि न, न्यायमते भेदस्य नित्यत्वेन नाशासम्भवात्। मोक्षदशायाम् आनन्दप्रतिपादकं श्रुतिवाक्यम् अपि नर्दुःखत्वादिना साम्यं प्रतिपादयति सम्पदाधिक्ये “पुरोहितोऽयं राजा संवृत्तः”[7] इति प्रयोगवत्।

वैशेषिकदर्शन आत्मनः अप्रत्यक्षत्वं अस्वीकृतम्, उक्तं च महर्षिकणादेन- “तत्रात्मा मनश्चाप्रत्यक्षे”[8] प्रशस्तपादानां मतेऽपि सुज्ञमत्वहेतोः आत्मनः प्रत्यक्षं न सम्भवति। महर्षिगौतमपादानां न्यायाभाष्यकाराणां वास्यायनपादानां मतेऽपि एवम् स्वीकृतम्। परन्तु उद्योतकरणां उदयनचार्याणां च मते “अहं सुखी अहं दुःखी” इत्यादि सुखदुःखादीनां मानसप्रत्यक्षकाले आत्मनोऽपि प्रत्यक्षं न भवति। विश्वनाथपादानामपि इदमेव मतम् तदुक्तं - “धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः”[9] इति।

धर्माणाम् अधर्माणां च आश्रयभूतोऽयम् आत्मा, तस्य च आत्मनो योग्यविशेषगुणानां ज्ञानसुखादीनां सम्बन्धेन प्रत्यक्षत्वं सम्भवति। न तु अन्यथा “अहं जाने” अहं करोमि इत्यादि प्रतीतेः। प्रत्यक्षं चात्र मानसम्, न तु इन्द्रियान्तरजन्यम्, आत्मनः रूपादयभावेन इन्द्रियान्तरप्रत्यक्षायोग्यत्वात्, तदुक्तम् “मनोमात्रस्य गोचरः”[10] इति। केवल मानसप्रत्यक्षस्य विषयोऽयमात्मा इत्यर्थः, एवं यद्यपि मानसप्रत्यविषयत्वात् आत्मनोऽस्तीति केषांचिद् अभिमतम्, तथापि विप्रतिपन्नौः चार्वाकादिभिः प्रथमत एव शरीरादिभिन्न आत्मा न प्रतिपत्तं शक्यते इति अनुमानं प्रदर्श्यते। “आत्मेन्द्रियाद्यधिकता करणं हि सकर्तृकम्”, आत्मा इन्द्रियाणां शरीरस्य च परम्पराया चैतन्यसम्पादकः। इन्द्रियाणां जनकतासम्बन्धेन शरीरस्य च अवच्छेदकतासम्बन्धेन शरीरस्य च अवच्छेदकतासम्बन्धेन आत्मा अधिष्ठाता इन्द्रियाणइ शरीरं च ज्ञानाधिष्ठितानि अचेतनत्वे सति ज्ञानवत्वाद् इति अनुमानप्रयोगः।

अपि च इन्द्रियाणां ज्ञानकरणत्वात् तेषां कश्चन कर्त्ता स्वीकरणीयः कुठारादीनां च्छिदादिकरणानां यथा कर्त्तारम् अन्तरेण फलोपधानं न दृश्यते एवं चक्षुरादीनां ज्ञानकरणानाम् अपि फलोपधानं कर्त्तरम् अन्तरेण नोपपद्यते। इन्द्रियाणां करणत्वं च धर्मिग्राहकप्रमाणसिद्धम्। धर्मिग्राहकप्रमाणं च शब्दद्युपलब्ध्यः करणसाध्याः कार्यत्वात् च्छिदादिक्रियावद् इति, एवम् इन्द्रियाणां करणत्वे सिद्धेः करणैश्च तेषां कर्त्ता अनुमीयते, स एव आत्मा ।

**पाद टिप्पणी:**

[1] तर्क. सं - 18

[2] मुक्तावली

[3] तर्कसंग्रहः 19-20

[4] मुक्तावली - 153

[5] क. व. द्र. प्र. भा. – 54

[6] सां. का. – श्लोक- 18

[7] मुक्तावल्याम् –पृ - 166

[8] का. व.- 49

[9] का. व.- 50

[10] का. व.- 47